# SarvasAra Upanishad

# સર્વસારોપનિષત્

## Document Information

Text title : Sarvasara Upanishad

File name : sarvasara.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 33/108; Krishna Yajurveda - Samanya upanishad

Latest update : Jan. 12, 2000

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# સર્વસારોપનિષત્

સમસ્તવેદાન્તસારસિદ્ધાન્તાર્થકલેવરમ્ ।
વિકલેવરકૈવલ્યં રામચન્દ્રપદં ભજે ॥

સર્વસારં નિરાલમ્બં રહસ્યં વજ્રસૂચિકમ્ ।
તેજોનાદધ્યાનવિદ્યાયોગતત્ત્વાત્મબોધકમ્ ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

કથં બન્ધઃ કથં મોક્ષઃ કા વિદ્યા કાઽવિદ્યેતિ ।
જાગ્રત્સ્વપ્નસુષુપ્તિતુરીયં ચ કથમ્ ।
અન્નમયપ્રાણમયમનોમયવિજ્ઞાનમયાનન્દમયકોશાઃ કથમ્ ।
કર્તા જીવઃ પઞ્ચવર્ગઃ ક્ષેત્રજ્ઞઃ સાક્ષી કૂટસ્થોઽન્તર્યામી કથમ્ ।
પ્રત્યગાત્મા પરાત્મા માયા ચેતિ કથમ્ ।
આત્મેશ્વરજીવઃ અનાત્મનાં દેહાદીનામાત્મત્વેનાભિમન્યતે
સોઽભિમાન આત્મનો બન્ધઃ । તન્નિવૃત્તિર્મોક્ષઃ ।
યા તદભિમાનં કારયતિ સા અવિદ્યા । સોઽભિમાનો યયા
નિવર્તતે સા વિદ્યા । મન આદિચતુર્દશકરણૈઃ
પુષ્કલૈરાદિત્યાદ્યનુગૃહીતૈઃ શબ્દાદીન્વિષયાન્-
સ્થૂલાન્યદોપલભતે તદાત્મનો જાગરણમ્ ।
તદ્વાસનાસહિતૈશ્ચતુર્દશકરણૈઃ શબ્દાદ્યભાવેઽપિ
વાસનામયાઞ્છબ્દાદીન્યદોપલભતે તદાત્મનઃ સ્વપ્નમ્ ।
ચતુર્દશકરણો પરમાદ્વિશેષવિજ્ઞાનાભાવાદ્યદા
શબ્દાદીન્નોપલભતે તદાત્મનઃ સુષુપ્તમ્ ।
અવસ્થાત્રયભાવાભાવસાક્ષી સ્વયંભાવરહિતં
નૈરન્તર્યં ચૈતન્યં યદા તદા તુરીયં ચૈતન્યમિત્યુચ્યતે ।

અન્નકાર્યાણાં કોશાનાં સમૂહોઽન્નમયઃ કોશ ઉચ્યતે ।
પ્રાણાદિચતુર્દશવાયુભેદા અન્નમયકોશે યદા વર્તન્તે
તદા પ્રાણમયઃ કોશ ઇત્યુચ્યતે ।
એતત્કોશદ્વયસંસક્તં મન આદિ ચતુર્દશકરણૈરાત્મા
શબ્દાદિવિષયસઙ્કલ્પાદીન્ધર્માન્યદા કરોતિ તદા મનોમયઃ
કોશ ઇત્યુચ્યતે । એતત્કોશત્રયસંસક્તં તદ્ગતવિશેષજ્ઞો
યદા ભાસતે તદા વિજ્ઞાનમયઃ કોશ ઇત્યુચ્યતે ।
એતત્કોશચતુષ્ટયં સંસક્તં સ્વકારણાજ્ઞાને
વટકણિકાયામિવ વૃક્ષો યદા વર્તતે તદાનન્દમયઃ કોશ
ઇત્યુચ્યતે । સુખદુઃખબુદ્ધ્યા શ્રેયોઽન્તઃ કર્તા યદા તદા
ઇષ્ટવિષયે બુદ્ધિઃ સુખબુદ્ધિરનિષ્ટવિષયે બુદ્ધિર્દુઃખબુદ્ધિઃ ।
શબ્દસ્પર્શરૂપરસગન્ધાઃ સુખદુઃખહેતવઃ ।
પુણ્યપાપકર્માનુસારી ભૂત્વા પ્રાપ્તશરીરસંયોગ-
મપ્રાપ્તશરીરસંયોગમિવ કુર્વાણો યદા દૃશ્યતે
તદોપહિતજીવ ઇત્યુચ્યતે । મન આદિશ્ચ
પ્રાણાદિશ્ચેચ્છાદિશ્ચ સત્ત્વાદિશ્ચ પુણ્યાદિશ્ચૈતે
પઞ્ચવર્ગા ઇત્યેતેષાં પઞ્ચવર્ગાણાં ધર્મીભૂતાત્મા
જ્ઞાનાદૃતે ન વિનશ્યત્યાત્મસન્નિધૌ નિત્યત્વેન
પ્રતીયમાન આત્મોપાધિર્યસ્તલ્લિઙ્ગશરીરં
હૃદ્ગ્રન્થિરિત્યુચ્યતે તત્ર યત્પ્રકાશતે ચૈતન્યં સ
ક્ષેત્રજ્ઞ ઇત્યુચ્યતે । જ્ઞાતૃજ્ઞાનજ્ઞેયાનામાવિર્ભાવ-
તિરોભાવજ્ઞાતા સ્વયમાવિર્ભાવતિરોભાવરહિતઃ
સ્વયંજ્યોતિઃ સાક્ષીત્યુચ્યતે ।
બ્રહ્માદિપિપીલિકાપર્યન્તં સર્વપ્રાણિબુદ્ધિષ્વવશિષ્ટત-
યોપલભ્યમાનઃ સર્વપ્રાણિબુદ્ધિસ્થો યદા તદા કૂટસ્થ
ઇત્યુચ્યતે । કૂટસ્થોપહિતભેદાનાં સ્વરૂપલાભહેતુર્ભૂત્વા
મણિગણે સૂત્રમિવ સર્વક્ષેત્રેષ્વનુસ્યૂતત્વેન યદા કાશ્યતે
આત્મા તદાન્તર્યામીત્યુચ્યતે ।
સત્યં જ્ઞાનમનન્તં બ્રહ્મ । સત્યમવિનાશિ । અવિનાશિ
નામ દેશકાલવસ્તુનિમિત્તેષુ વિનશ્યત્સુ યન્ન વિનશ્યતિ
તદવિનાશિ । જ્ઞાનં નામોત્પત્તિવિનાશરહિતં નૈરન્તર્યં
ચૈતન્યં જ્ઞાનમુચ્યતે । અનન્તં નામ મૃદ્વિકારેષુ

મૃદિવ સ્વર્ણવિકારેષુ સ્વર્ણમિવ તન્તુવિકારેષુ
તન્તુરિવાવ્યક્તાદિસૃષ્ટિપ્રપઞ્ચેષુ પૂર્ણં વ્યાપકં
ચૈતન્યમનન્તમિત્યુચ્યતે ।
આનન્દં નામ સુખચૈતન્યસ્વરૂપોઽપરિમિતાનન્દ-
સમુદ્રોઽવશિષ્ટસુખસ્વરૂપશ્ચાનન્દ ઇત્યુચ્યતે ।
એતદ્વસ્તુચતુષ્ટયં યસ્ય લક્ષણં દેશકાલ-
વસ્તુનિમિત્તેશ્વવ્યભિચારી તત્પદાર્થઃ પરમાત્મેત્યુચ્યતે ।
ત્વંપદાર્થાદૌપાધિકાત્તત્પદાર્થાદૌપાધિક-
ભેદાદ્વિલક્ષણમાકાશવત્સૂક્ષ્મં કેવલસત્તા-
માત્રસ્વભાવં પરં બ્રહ્મેત્યુચ્યતે । માયા નામ
અનાદિરન્તવતી પ્રમાણાપ્રમાણસાધારણા ન સતી
નાસતી ન સદસતી સ્વયમધિકા વિકારરહિતા નિરુપ્યમાણા
સતીતરલક્ષણશૂન્યા સા માયેત્યુચ્યતે । અજ્ઞાનં
તુચ્છાપ્યસતી કાલત્રયેઽપિ પામરાણાં વાસ્તવી ચ
સત્ત્વબુદ્ધિર્લૌકિકાનામિદમિત્થમિત્યનિર્વચનીયા વક્તું ન શક્યતે ।
નાહં ભવામ્યહં દેવો નેન્દ્રિયાણિ દશૈવ તુ ।
ન બુદ્ધિર્ન મનઃ શશ્વન્નાહઙ્કારસ્તથૈવ ચ ॥ ૧॥

અપ્રાણો હ્યમનાઃ શુભ્રો બુદ્ધ્યાદીનાં હિ સર્વદા ।
સાક્ષ્યહં સર્વદા નિત્યશ્ચિન્માત્રોઽહં ન સંશયઃ ॥ ૨॥

નાહં કર્તા નૈવ ભોક્તા પ્રકૃતેઃ સાક્ષિરૂપકઃ ।
મત્સાન્નિધ્યાત્પ્રવર્તન્તે દેહાદ્યા અજડા ઇવ ॥ ૩॥

સ્થાણુર્નિત્યઃ સદાનન્દઃ શુદ્ધો જ્ઞાનમયોઽમલઃ ।
આત્માહં સર્વભૂતાનાં વિભુઃ સાક્ષી ન સંશયઃ ॥ ૪॥

બ્રહ્મૈવાહં સર્વવેદાન્તવેદ્યં
    નાહં વેદ્યં વ્યોમવાતાદિરૂપમ્ ।
રૂપં નાહં નામ નાહં ન કર્મ
    બ્રહ્મૈવાહં સચ્ચિદાનન્દરૂપમ્ ॥ ૫॥

નાહં દેહો જન્મમૃત્યુ કુતો મે
    નાહં પ્રાણઃ ક્ષુત્પિપાસે કુતો મે ।
નાહં ચેતઃ શોકમોહૌ કુતો મે

નાહં કર્તા બન્ધમોક્ષૌ કુતો મ ઇત્યુપનિષત્ ॥

ॐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded by Sunder Hattangadi

---

*SarvasAra Upanishad*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*